योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः १५५

पञ्चपञ्चाशदधिकशततमः सर्गः १५५

अग्निरुवाच ।

इत्याकर्ण्याथ स व्याधस्तदा तस्मिन्वनान्तरे ।

आसीच्चित्रकृताकार इव विस्मयमन्थरः ।। १

न विशश्राम चेतोऽस्य स्वाभ्यासेन विना पदे ।

आसीदुद्भ्रान्त इव स प्रोह्यमान इवार्णवे ।। २

आरूढ इव वा चक्रे चक्रेण तपसा हृतः ।

नक्रेणेव समाक्रान्तः पराक्रमविवर्जितः ।। ३

किमेतत्स्यादुतान्यत्स्यान्निर्वाणमिति संशयात् ।

नाध्यगच्छदसौ शान्तिं मूर्खो यौवनवानिव ।। ४

अविद्याकृतमेवेदं दृश्यमित्येव चिन्तयन् ।

अविद्या जगदित्येषा नायाति निपुणं हृदि ।। ५

कियदन्तमिदं दृश्यं स्यात्पश्याम्येतदादितः ।

दूरतोर्ध्वप्रमाणेन तपोलब्धशरीरकः ।। ६

भावाभावात्मनो नित्यमस्यान्ते स्थीयते सुखम् ।

तस्मादाकाशमप्यस्ति यत्र नो तत्र याम्यहम् ।। ७

इति निर्णीय हृदये मूर्ख एव बभूव सः ।

गतं तादृशमप्युक्तं विनाभ्यासेन भस्मनि ।। ८

ततस्ततः प्रभृत्येव तेनैव मुनिभिः सह ।

लुब्धकत्वं परित्यज्य तपश्चरितुमुद्यतः ।। ९

तस्मिञ्जगति तैर्भावैस्तैः समं निवसन्सदा ।

बहून्यब्दसहस्राणि चकार सुमहत्तपः ।। १०

तपः कुर्वन्कदाचित्स पुनः पप्रच्छ तं मुनिम् ।

कदा स्यादात्मविश्रान्तिर्ममेत्याह मुनिस्ततः ।। ११

मुनिरुवाच ।

ज्ञानं तदुपदिष्टं ते जीर्णदार्वल्पकाग्निवत् ।

संस्थितं हृदये किंतु दाढ्यमाक्रम्य नोचितम् ।। १२

नाभ्यासेन विना ज्ञाने शिवे विश्रान्तवानसि ।

अभ्यासेन तु कालेन भृशं विश्रान्तिमेष्यसि ।। १३

भविष्यदिदमात्मीयमथाकर्णय निर्णयम् ।

मम वर्णयतः कर्णभूषणं भूतलाद्भुतम् ।। १४

संस्तुतानवबुद्धात्मा ज्ञानसारतयानया ।

दोलायमानसंवित्त्वं न मूर्खो न च पण्डितः ।। १५

अविद्यारूपमाभोगि किंप्रमाणमिदं जगत् ।

स्यादित्यात्मविकल्पेन तपस्त्वं कर्तुमुद्यतः ।। १६

इत्थं तपस्त्वया घोरं कार्यं युगशतं पृथु ।

परमेष्ठी ततस्तुष्टस्त्वामुपैष्यति सामरः ।। १७

मार्गयिष्यसि तस्य त्वं वरदस्य वरं वर ।

इदमुद्दामदौरात्म्यान्निजं संदेहसंशयम् ।। १८

देवायं दृश्यरूपेऽस्मिन्दृष्टेऽविद्याभ्रमे सति ।

क्वचिदादर्शवन्नास्ति प्रतिबिम्बमलोज्झितः ।। १९

चिद्व्योमदर्पणस्यास्य परमाण्वाकृतेरपि ।

अन्तस्थस्यैव वा यत्र तत्रेदं प्रतिबिम्बति ।। २०

तस्मात्कियदनन्तं स्यादिदं दृश्यमनर्थकृत् ।

तस्य पारे कियद्वा स्यादाकाशं दृश्यमेव तत् ।। २१

एवमर्थमहं ज्ञातुमिमं संप्रार्थये वरम् ।

श्रृणु देवेश्वराविघ्नं तथैवाशु प्रयच्छ मे ।। २२

इयं स्वच्छन्दमृत्युर्मे नीरोगाऽस्तु तनुश्चिरम् ।

गारुडेन च वेगेन संयुता व्योमगामिनी ।। २३

प्रतिनाडीकमेषा तु वृद्धिं गच्छतु योजनम् ।

क्रमेण जगतो बाह्ये भवत्वाकाशरूपिणी ।। २४

साकाशस्यास्य दृश्यस्य लभेय परमेश्वर ।

अन्तमित्थमनन्तस्य परमोऽस्त्विति मे वरः ।। २५

इति साधो त्वया प्रोक्ते देवदेवो वरं प्रभुः ।

एवमस्तु तवेत्युक्त्वा यास्यत्यन्तर्धिमीश्वरः ।। २६

गते तस्मिन्महादेवे देवैः सह दिवस्पतौ ।

तपसा ते कृशो देहश्चन्द्रकान्तिर्भविष्यति ।। २७

मामापृच्छन्नमस्कृत्य तस्मिन्नेव क्षणे ततः ।

प्लुतिमेष्यति स व्योम्नि चित्तस्थार्थदिदृक्षया ।। २८

द्वितीय इव शीतांशुर्द्वितीय इव भास्करः ।

द्वितीय इव वौर्वाग्निश्चन्द्रार्कस्पर्धयोत्थितः ।। २९

ततो गरुडवेगेन दृश्यस्य नभसस्तथा ।

अन्तं प्राप्तुं वहन्वेगाज्जगतः सरितामिव ।। ३०

जगतोन्ते ततोऽजस्रं ततो वर्धिष्यते वपुः ।

कल्पान्तमत्तार्णववन्निष्पाराम्बरपूरणम् ।। ३१

द्रक्ष्यस्यथ महाव्योम्नि वर्धमानो बृहद्वपुः ।

सर्गान्निरर्गलाधारनिरन्तगगनक्रमात् ।। ३२

परमार्थमहाकाशशून्यतावातचक्रकान् ।

स्वभावद्रवतोद्देशाच्चिदर्णवतरङ्गकान् ।। ३३

संविद्घने यथा स्वप्ने पुराद्या भान्ति खात्मकाः ।

तथा तदा तवैष्यन्ति सर्गवर्गा निरर्गलाः ।। ३४

विस्फुरन्ति महाव्योम्नि पर्णौघाः क्षुभितानिलैः ।

तथा सर्गाननन्तांस्त्वं द्रक्ष्यस्यक्षीणनिश्चयः ।। ३५

सभासत्येक्षणरुचां यथा जालं सदप्यसत् ।

जगदात्म तथाकाशसंविदां खे सदप्यसत् ।। ३६

सर्वोर्वीजनदृष्टानां लग्नानामिन्दुमण्डले ।

यादृग्जालं जगत्तादृक्स्थितेऽनन्यत्वमात्मनः ।। ३७

पुनः सर्गः पुनर्व्योम पुनः सर्गः पुनर्नभः ।

इत्येवं पश्यतस्तेऽत्र दीर्घकालः प्रयास्यति ।। ३८

अथ दीर्घेण कालेन प्रस्फुरन्सर्गपर्णके ।

उद्वेगमेष्यसि व्योम्नि महामहिमनि स्वयम् ।। ३९

उद्वेगमेष्यसि ततस्तपसोऽनुभवत्फलम् ।

निर्देक्ष्यसि तदा देहमनन्ताम्बरपूरकम् ।। ४०

किमिदं कुशरीरं मे भारभूतमिव स्थितम् ।

मेर्वादिभूभृतां लक्षमपि यस्मिंस्तृणायते ।। ४१

देहो ममाप्रमाणोऽयं व्याप्तं व्योम मयाखिलम् ।

पूरयामि खमद्यापि भावि नैवोपगम्यते ।। ४२

अविद्या बत घोरेयमनन्ता च प्रमीयते ।

मीयते न च केनापि ब्रह्मज्ञानं समं विना ।। ४३

तमिमं संत्यजाम्येव देहमाविवृतान्तरम् ।

नानेन किंचिदाप्नोमि साधुसच्छास्त्रसंगमम् ।। ४४

अनन्तापारपर्यन्तं निरालम्बाम्बरास्पदम् ।

किं नामेदं शरीरं मे सुदुष्प्रापार्थसंगमम् ।। ४५

इति संचिन्त्य तं देहं धारणां प्राणरेचनीम् ।

कृत्वा त्यक्ष्यसि संभुक्तात्फलाच्छुष्कं यथा खगः ।। ४६

कृत्वा देहपरित्यागं जीवः प्राणसमन्वितः ।

व्योम्नि स्थास्यति ते तस्मिन्वातात्सूक्ष्मोऽपि वातवत् ।

छिन्नपक्षो महामेरुरिव देहः पतिष्यति ।

तत्र भूलोकशैलादि सर्वं चूर्णीकरिष्यति ।। ४८

शुष्का भगवती देहं तत्तदा भक्षयिष्यति ।

समातृमण्डला तेन निर्दोषा भूर्भविष्यति ।। ४९

इत्यात्मोदन्तमखिलं श्रुतवानसि सुव्रत ।

तपस्तालीवने कृत्वा यथेच्छसि तथा कुरु ।। ५०

व्याध उवाच ।

अहो नु भगवन्दुःखं परिभोक्तव्यमक्षयम् ।

मया व्यर्थमनर्थाय यदर्थेन दुरर्थितम् ।। ५१

विद्यते किं विभो काचिद्युक्तिः सैषा स्थितिर्वर ।

अन्यथा भवितव्योऽर्थो यदि नास्ति तदुच्यताम् ।। ५२

मुनिरुवाच ।

अवश्यंभवितव्योऽर्थो न कदाचन केनचित् ।

विधातुमन्यथा शक्यस्तन्न क्षरति यत्नतः ।। ५३

वामावामशिरःपादविपर्ययविधौ यथा ।

पुंसो न विद्यते शक्तिस्तथा भाव्यन्यथास्थितौ ।। ५४

ज्योतिःशास्त्रार्थविज्ञानैरिह भाव्यर्थवेदनम् ।

भवत्यन्यदपूर्वं तु न किंचन कदाचन ।। ५५

जयन्ति कर्माणि हि वेदनानि

यैः प्राकृतैरद्यतनान्युपेत्य ।

शरीरदाहैरपि निर्विकारसंविन्नयैर्ब्रह्मतयैव सुप्तम् ।। ५६

इत्यार्षे श्रीवासिष्ठमहा० वा० दे० मो० नि० उ० अ० वि० श० भाविसंपत्तिवर्णनं नाम पञ्चपञ्चाशदधिकशततमः सर्गः ।। १५५ ।।